# Shri Vishnu Nirajanam

# श्रीविष्णुनीराजनम्

## Document Information

Text title : viShNunIrAjanam

File name : viShNunIrAjanam.itx

Category : vishhnu, AratI

Location : doc_vishhnu

Transliterated by : Venkata krishna T.

Proofread by : Venkata krishna T., NA

Latest update : February 17, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 18, 2022

*sanskritdocuments.org*

Shri Vishnu Nirajanam

# श्रीविष्णुनीराजनम्

जय माधव मधुसूदन जय करुणासिन्धो ।
जय भवभीतिविनाशन शरणागतबन्धो ॥

जय देव जय देव ॥ १॥

वन्दे कमलेशानं विनतासुतयानम् ।
जगदेकान्तनिदानं वाञ्छितवरदानम् ॥

जय देव जय देव ॥ २॥

मुकुटविभूषितभालं शोभितवनमालम् ।
श्यामलकुञ्चितबालं त्रिभुवनजनपालम् ॥

जय देव जय देव ॥ ३॥

कटितटपीतदुकूलं विश्वविटपमूलम् ।
भवसागरजलकूलं भजतामनुकूलम् ॥

जय देव जय देव ॥ ४॥

सागरजापरिवारं कौस्तुभमणिहारम् ।
क्षीराम्भोधिविहारं निगमागमसारम् ॥

जय देव जय देव ॥ ५॥

शेषशरीरनिवासं विमलाम्बरभासम् ।
श्रीवैकुण्ठविलासं दानवकुलनाशम् ॥

जय देव जय देव ॥ ६॥

शङ्खगदाम्बुजधारं चतुर्भुजाकारम् ।
वृन्दारकहितकारं भववारिधिपारम् ॥

जय देव जय देव ॥ ७॥

कमलाश्रितवामाङ्गं भूषितसकलाङ्गम् ।
सुन्दरकरुणापाङ्गं मणिमञ्जुवराङ्गम् ॥

जय देव जय देव ॥ ८॥

पार्षदपूगसमेतं सुरगणसमवेतम् ।
ब्रह्मानन्दनिकेतं मुनिजनसमुपेतम् ॥

जय देव जय देव ॥ ९॥

हरिनीराजनमेतत्पठति नरो नित्यम् ।
विष्णोर्लोकमशोकं व्रजति स वै सत्यम् ॥

जय देव जय देव ॥ १०॥

इति श्रीब्रह्मानन्दस्वामिविरचितं विष्णुनीराजनं समाप्तम् ॥

Encoded and proofread by Venkata krishna T.

*Shri Vishnu Nirajanam*

pdf was typeset on February 18, 2022

Please send corrections to *sanskrit@cheerful.com*